मानाधिकरणतयापकिंचित्सहचारदर्शनेसत्वेपिकार्यानुसत्वानतत्प्रयोजकाभावप्रतियोगिकारणतरस्यावच्छेदक
त्वेनेनसहास्यासिद्धितयाचेतिमन्तव्यं आशुविनाशिनामिति॰ तेनोपलक्षणात्वनिर्ध्वंसप्रतियोगिकामित्यर्थः
क्रमिविकाशा॰ युगपदनुत्पन्नानां॰ मेलकाभावात्॰ एकक्षणावस्थापित्वासंभवात् अत्रचिरस्थायिनामेलनसंभवा
दाशुविनाशिनामित्युक्तं॰ आशुविनाशिनामस्थिरत्वात्मनानादीनांमेलनसंभवात्क्रमिकाणामित्युक्तं आशुवि
नाशिनोः क्रमिकत्वयोर्मेलनसंभवाद्द्वयवचनं तथाचैकस्मिन्नात्मनिचैकक्षणावच्छेदेनयत्स्यासिसंबंधेनसमयत्वावि
शिष्टदर्शनाधिकरणत्वस्याप्रसिद्ध्यापर्याप्तिसंबंधेनसमयोदर्शनतद्विनिमयत्वेव्याप्तिग्रहजनकतावच्छेदकत्वाभावेसाध्ये
एकक्षणावच्छेदेनौकात्म्यवृत्त्यधिकरणतानिरूपकतानवच्छेदकत्वंव्याप्तिग्रहसमानाधिकरणाभावप्रतियोगि
तावच्छेदकत्वंवाहेतुरितिभावः॰ एतद्भयोर्दर्शनंनव्याप्तिप्रत्यक्षमात्रवृत्तिधर्मावच्छिन्नकार्यतानिरूपितकारणतानाकं

राम

नगम्येति। भयोर्दर्शनजन्यप्रत्यक्षविषयत्वाभावेन साध्यः तथा सति साध्याप्रसिद्ध्यापत्तेः भयोर्दर्शनजन्य
प्रत्यक्षविषयत्वरूपप्रतियोगिनोऽप्रसिद्धत्वात् नच विशिष्टज्ञानं प्रति विशेषणज्ञानस्योपनीतभानं प्रति चोपना
यकज्ञानस्य च हेतुतया तज्जन्यप्रत्यक्षविषयत्वमादाय प्रतियोगिप्रसिद्धिः संभवतीति वाच्यं। प्राभाकरैरनादृ
ताकार्यकारणभावानङ्गीकारात् नच तथापि प्राभाकरैर्विशिष्टवैशिष्ट्यबोधं प्रति विशेषणतावच्छेदकप्रकार
कनिश्चयस्य हेतुतायाः स्वीकारेण प्रतियोगिप्रसिद्धिः सहचारविशिष्टहेतुवैशिष्ट्यावगाहिप्रत्यक्षस्य भूयस्सह
चारदर्शननिष्ठायाः स्वरूपयोग्यजनकतानतिरूपितजन्यताश्रयत्वादिति वाच्यं। तथा सति बाधापत्तेः। किन्तु भूयो
दर्शननिष्ठतद्दर्शनत्वं। तन्निष्ठभूयस्त्वं वा पर्याप्तिसम्बन्धेनतावच्छेदकमिति साध्यमिति भावः अत्र क्रमेणाहेतुमाह
दर्शनामित्यादिना। प्रत्येकं। नतद्दर्शनत्वेनः स्वहेतुत्वादिति निपतनपर्यवसितत्वाभावाद्साध्याप्रसिद्धत्वाद्व्यर्थः निय
तपर्यवसितताऽनवच्छेदकत्वाद्साध्याप्रसिद्धिनिरूपकतावच्छेदकत्वाद्धेतुनिपातात् अत्र तत्तद्दर्शनत्वानां निपतनपर्यव

चि·वा·

न· द्वितीयहेतोरस्वरूपासिद्धिरिति प्रायेणाशंकते· नचेति तावद्धर्मितज्ज्ञानसंस्काराः स्वरूपसत्त्वाद्धर्मितत्स
संस्काराः इन्द्रियसंबन्धकृताइति तेन व्याप्तिप्रत्यक्षत्वस्य तज्ज्ञानावच्छेदकत्वं सचितं· स्वानुमानिकव्याप्तिज्ञानेऽपि
स्वीकारानपेक्षत्वात्· व्याप्तिधीहेतवः व्याप्तिप्रत्यक्षहेतवः प्रत्यक्षादिज्ञानेन संस्कारेण तद्बुद्धिरिति मियत्वेऽनापन्नासमि
त्यायामिति तथात्वकल्पनात्· संस्कारसहकारित्वकल्पनात् तथाचेन्द्रियेणप्रत्यभिज्ञानजननेनतात्र्वोसंस्कारस
सहकारितायाः कृप्तत्वेनप्रकृतेपि व्याप्तिप्रत्यक्षेइन्द्रियेण जननीयतत्वेतज्ज्ञानितसंस्कारणाद्धेतुत्वैनैकाधिकर
णोक्त्वणावच्छेदेनतज्जन्यसंस्कारसंबन्धेनस्वरूपसंसर्गवाद्धर्मितानासत्वेनद्वितीयहेतोरस्वरूपासिद्धिरितिभा
व· ननुसमानविशेष्यकस्मरणोप्रत्यक्षेत्वतादृशसंस्कारस्यवहेतुः अन्यथातिप्रसंगात्· तथाचधर्मसमानाधिकरण
त्वेनाभावाप्रतियोगितावच्छेदकसामानाधिकरण्यप्रकारकव्याप्तिप्रत्यक्षेसहयोगात्वस्वरूपसत्त्वाद्धर्मितज्ज्ञानसंस्कारविनैवस्वरूप
कर्षादिनाग्रहीतत्वेनागृहीतव्यापककत्वाज्ञानग्रहसंबन्धेनैवामुपयोगोवक्तव्यः सचतत्तंनभवति· यत्तद्विशेष्यकस्मृत्वा

११०

यत्नादृष्टाकारणतावच्छेदकरूपशून्यत्वादिति प्रयोगः न च साध्याविशेषः कारणतावच्छेदकधर्मवत्त्वस्यैव कारण
तारूपत्वादिति वाच्यं अन्योन्याभावात्यन्ताभावभेदेन भेदादिति यद्यपि व्याप्तिर्नभयोर्दर्शनगम्या तस्याः सहचारद
र्शननिष्टभयत्वव्याप्तिप्रत्यक्षजनकतावच्छेदकं नेत्यर्थः तन्मतेऽपि सन्निकर्षादिष्विति धर्मघटनादृष्टजनकताव
च्छेदकत्वस्य प्रसिद्ध्या नाप्रसिद्धिः अत्र व्याप्तिप्रत्यक्षजनकतावच्छेदकत्वाभावादिति हेतुः पर्यालोपः साध्यस्य त
न्योन्याभावगर्भत्वात् हेतोः साध्याविशेष इति तन्मतमेव परिष्कृतं तदुभयमपि न सम्यक् अस्मद्गुरोरन्यैव सम
वेदितुः पराणम्यानुचितत्वात् तादृशावच्छेदकभेदावच्छेदकत्वाभावपर्यवसानेन सिद्धसाधनात् न च धर्मिणो भेद
पि तादृशावच्छेदकभेदः तद्वत्तात्यन्ताभावत्वरूपधर्मभेदात् न सिद्धसाधनावकाश इति वाच्यं तथापि तादृशावच्छेदकत्वाभा
वरूपहेतुनिष्कृष्यैवं वैयापकमतनिरासेन भेदेन साधनस्यापि प्रयोजनत्वादित्यादिकं न्यायाशुविनाशिनां स्वतो मे
लनाभावेऽपि तज्जन्यसंस्काररूपव्यापारद्वारा मेलनसंभवति नादृष्टमेलनस्यापि भयत्वेन कारणतानिर्वाहकत्वा

वि॰ बा॰

ज्ञाप्यकोस्य प्रकारकसंस्कारोत्पत्तिज्ञोप्यकास्य प्रकारकस्मरणोत्पादेऽतिप्रसंगः घटविषयकसंस्कारो
त्पापटविषयकस्मरणप्रसंगः ननु यन्नियमोऽयामालिकद्रति यदि ब्रूयात्तदापि हृतणां तमभिधानभयोरर्थी
नपदार्थालितर्कयति। किंचेसाहित्यान्तर्गाह्येभयोर्भ्योऽनेकव्याप्तिप्रसक्तेर्भ्योऽनेकव्याप्तिप्रसक्त्यार्थदर्शनमित्य
नुक्तसमुच्चायकः संबंधः सहचाराः नच्याव्याप्तिप्रत्यक्षप्रतिसंस्काराद्वारा संबंधमभयोर्दर्शनमित्यकारणत्वमपि
हितं नत्संबंधमभयोर्दर्शनं किमित्यर्थः अथवा चतत्त्राह्योऽवधारणार्थः तथा च तदेव संबंधमभयोर्दर्शनमित्यर्थः भयस्य
छांने चेति। अत्र सत्यमर्थो वृत्तिलेनस्य सहचारपदार्थे कद्रयोः साध्यसाधनयोरन्वयः दर्शनं सहचारदर्शनम
यसा॰ साध्यसाधनानां। षष्ठ्यर्थसंबंधप्रतियोगितया विषयत्व॰ तस्य साध्यसाधनयोरन्वयः दर्शनं सहकार
दर्शनं दर्शनानि साध्यसाधनसहचारदर्शनानि ननु तथा॰ नव्याप्तियहात्मकं तत्राघेदोषमाह॰ एकत्वेन काधिकारण
वृत्तिरूपसमयोरित्यर्थः नेनद्वितीयकत्वासाध्यत्वेवदोषसंभेवस्थलांतरानुधावनमसंगतमिति त्रिकापरिहृताः स

राम॰

हस्तर्कानापेक्षणाद्वह्निविशेष्यकव्यापकताग्रहस्यमित्रविशेष्यकत्वात्तस्मान्धूमो हन्त्रीनानांव्यापारांसंबंधेनापिन
व्याप्तिग्रहोपयोगि नेत्या त्रोपनीता हृासमानविषयत्वेति तद्विशेष्यकतत्प्रकारकसंस्कारात्तद्विशेष्यकतत्प्रकारक
स्मरणे तादृशाप्रसक्तिज्ञाने च हेतुरित्यर्थः सत्त्वोपनीतमानसमनुपेलञ्चनदुक्तिा सहचारदर्शनजन्यसंस्कारव्याप्ति
प्रत्यक्षयोः समानविषयकत्वाभावादित्यर्थः सहचारविषयकसंस्कारेण धूमविशेष्यकसहचारप्रकारकसंस्कारे
ण व्याप्तिज्ञाने व्याप्तिप्रत्यक्षे व्याप्तिशरीरघटकव्यापकत्वप्रकारकवह्निविशेष्यकप्रत्यक्षमिति यावत् नन्वे
वं रजतविशेष्यकरजतत्वप्रकारकसंस्कारात्कथं शुक्तिविशेष्यकरजतत्वप्रकारकज्ञानमिति चेन्न तत्र हि रङ्ग
स्मरणात्मकज्ञानद्वयमेव प्राभाकरेणाङ्गीक्रियते एवं घटगोचरसंस्काराद्भूतलवृत्तिसंनिकर्षाद्भूतले घटवद्भूत
लमिति प्रत्यक्षं तद्भानमपि नाङ्गीक्रियते परं तु स एवायं घट इति प्रत्यभिज्ञानाङ्गीक्रियते अन्यथा छिद्रपांसि न्यूनेप्या
तेनतयभ्रानेसंस्कारजन्ये तन्नजनकसंस्कारविषयमुख्यविशेष्यकमिति नियमे व्यभिचारः अन्यथा ज्ञान्यादि

वि·वी·

नासंग्राहकत्वाद्वेत्यत आह· अपिवेति स्पर्शनेपि सहचारदर्शनेपि· व्याप्यग्राहकत्वात्· व्याप्तिप्रत्यक्षानुसारात्· तथा
चान्वयव्यभिचारयोर्गृहीतत्वविशिष्टसहचारदर्शनत्वेनापि कारणत्वेन संभवतीति भावः· ननु व्याप्तिप्रत्यक्षप्रति न सहचा
रदर्शनमात्रं हेतुः· किंतु तर्कोपि· तथा च तर्करूपसहकारिकारणाभावान्न व्यभिचार इत्याशंकते· तर्कसहकृतनि
तित्वं किं सहकृतत्वं किंवा विशिष्टं सहचारदर्शनं· तथा· व्याप्तिप्रत्यक्षप्रतिहेतु नहीति· व्याप्तिप्रत्यक्षं प्रति तर्कस्य सहका
रिकारणत्वेनाव्युपकल्पत्वं इत्यर्थः· सहचारेत्यादि· अत्र तर्केण व्याप्तिग्रहे जननीये व्यभिचारादर्शनस्य आपाद्यापा
गः· आपाद्यलक्षणेन जन्यत्वं तस्य योग्यत्वरूपमेव निवेशनीयं· प्रयोज्यत्वं तु स्वरूपसंबंधविशेषः· तेनानादेः अभि
चारज्ञानाभावे कथं तर्कजन्यत्वघटितत्वयापाद्यत्वमिति शंकानिरस्ताः· अभिचारज्ञानप्रतिबंधकतर्कप्रयोज्यत्व
स्य तद्दानाभावे सत्वे बाधकाभावेन तत्र तर्कव्यापारानपेक्षत्वात्· एतेन पार्थिवत्वलोहलेख्यत्वयोः सहचारद
र्शनसत्वेन व्यभिचारज्ञानकाले व्याप्तिप्रत्यक्षवारणाय व्यभिचारज्ञानसहकृततर्कस्य हेतुत्वमभिहितं· तच्चनं

१५०

तद्धटेपाकभेदेनरूपरसानांबहुत्वसंभवात् द्वितीयदोषमाह-द्रव्यत्वपृथिवीत्वयोश्चेति अत्रचसाध्येनकिंचिदव्याप्त्यनुक्तम
मुख्यपार्थक्येनसमुचितस्यानेकव्याप्तिप्रत्यक्षार्थसद्धेत्वादर्शनमितिकल्पस्यदूषणासमुचितंतत्प्राथम्यात्संभवत्वाद
स्यापिसद्धेत्वादर्शनस्यभपत्वविशिष्टव्याप्तिप्रत्यक्षाजनकत्वात्-तृतीयदोषमाह-एकत्वेनेति महानसरूपैकाधिक
रणावच्छेदेनैवेत्यर्थः व्याख्यातादिकेति-सपक्षसद्धेत्वादिविपक्षेष्वेवेति महानसरूपैकाधिकरणावच्छेदेनैवेत्यर्थः अ
र्शनेषुसमस्तिमित्यर्थः तद्धीप्रसंगात् व्याप्तिप्रत्यक्षप्रसंगात् ननुपक्षाधिकरणानांपत्वमप्रसिद्धंतत्रतृतीयकल्पस्याप्य
नेकाधिकरणेनात्मकमितिध्येतत्रप्रथमकल्पएकत्वाक्षिप्तदूषणेनोद्धूषणांतरमाह-सपक्षस्येति त्रितयत्वादित्वेन-त्रित्वव
त्वद्वादित्वेन-अननुगमात्।त्रित्वद्वादिसाधारणस्यपक्षत्वस्यैकस्याभावात्-तथाचपक्षत्वावच्छिन्नरूपव्याप्तिप्रत्यक्षप्रति
सद्धेत्वादर्शनानांतन्मपरत्वेनकारणत्वमितिभावः ननुव्याप्तिप्रत्यक्षंप्रतिसंस्कारद्वारासद्धेत्वादर्शनानांत्रित्वविशिष्ट
सद्धेत्वादर्शनानांसत्त्वात्नव्यभिचारइत्यतआह-भवतैवव्यभिचारस्यप्रदर्शितत्वात्-त्रित्वविशिष्टसद्धेत्वादर्शनस्

२९

चि॰ दी॰

दकयोर्व्याप्तिग्रहानाभावेन न तर्क एव नोत्थाप्यते। समाधत्ते॰ प्रथमदर्शने योनि॰ भूयस्सहचारदर्शनं विनापीत्यर्थः। अपि नाम

भूयस्सहचारदर्शनमलभ्यमनुक्तेपः॰ स्तुल्पकल्प॰ सततमिति॰ व्यभिचाराशंकाशून्यपुरुषस्य॰ तर्कसंभवात्॰ प्रतिबंधकाभावे

नकारणसंपत्त्या तर्कोत्पत्तिसंभवात् तथा च व्याप्तिग्रहं प्रति न प्रयोजकत्वमपि भूयः सहचारदर्शनस्येति भावः ननु व्यभिचा

रदर्शने सहचारदर्शने सहचारदर्शने सहकृतस्तर्क एव व्याप्तिग्रहं प्रति हेतुः॰ भूयस्सहचारदर्शनं तु पक्षस्य लिंगत्वेऽस्तीति

व्यभिचाराशंकाविरहानास्तिकुचित्तदोषतर्कप्रवृत्तानाबुधपुरुष न इति नैष्पापकानां निष्कृष्टमित्याशंक्यमानशंकाविनिराकृत

ते॰ न चैवमित्यादिना॰ एवमेवास्तु॰ तादृशात्तर्कस्यैव व्याप्तिग्रहं प्रति हेतुतास्तु॰ व्याप्तिग्रहमूलकत्वेनेति आपाद्यापा

दकयोर्व्याप्त्यंतमूलकत्वेनेत्यर्थः। अनवस्थानात्॰ तर्कोत्तो विनातद्व्याप्तिग्रहसामान्यव्याप्तिग्रहजन्यतर्कजन्यत्वेन वि

शिष्टतर्कविशिष्टव्याप्तिग्रहविशिष्टफलप्रसंग इति भावार्थः॰ अत्रोभयत्र वैशिष्ट्यलाभवहिरंगव्याप्तिलाघवतामानाधिक

रण्योभयप्रसंगवधेन बोध्यं तेन कालभेदमादाय पुरुषभेदमादाय वा न दोषः एतेनात्रानादित्वस्य व्याप्तिधारणं पक्षत्वेन व्याप्ति

ग्रहमूलकत्वस्य न तर्कमूलत्वेन च वैयधिकरण्यदोष इति शंका नवकाशः॰ अत्र यदि तर्कधारापाः नादित्वप्रसंग आपाद्य तेन

राम॰

संभवति । साक्षाद्व्यभिचारज्ञानाभावेन तत्र ज्ञाननिष्प्रयोगे तर्कस्य सामर्थ्यासिद्धत्वादिति दूषणापत्तेः आपाद्यापादयि-
त्रोः समव्याप्तिविरहे संभवात् अत एव दीधितिकृतापि उक्तं व्यभिचारस्फूर्तेन आपाततः सहकारितेति । तेषामप्ययमेवाशय-
यः आपादकस्य व्यापकत्वादिति उक्तश्छलेः तु व्यभिचाराग्रहणापत्तेः सहकारितापाद्यानन्यापकत्वादि सर्थः लाघवाश्चेति
विलाटस्तत्र ग्राम्यादि कटुत्विमंत्य । अथवा सोपि सहचारज्ञानं समव्याप्तिलक्षणप्रतिजनकत्वे सहचारज्ञानं ततो तर्कस्य त्वीभ
तापाद्यापादकयोर्व्याप्तिज्ञानेन तत्र तर्कस्तत्तो व्यभिचारज्ञानाकानिरूनिमित्तो व्याप्तिप्रत्यक्षमिति बहुपपापकस्य नोपपत्ति-
गौरवं तर्कस्य सनव्यात्वेनेत्वमिति लाघवमिति कथं चित्समाधानेऽपः किमपोद्ध्वानेनेति किंचित्त्वघटितसहचारदर्शनत्वस-
हेतुतावच्छेदकत्वेनेत्यर्थः ननु नितरां व्यभिचारस्फूर्तेन समव्याप्तिप्रत्यक्षजनिकारणता संभवेपि प्रयोजकत्वं न संभव-
त्येव । तदभावेन कोवतारप्रेवासंभवात् तत्सत्वेन तापाद्यापादकयोर्व्याप्तिज्ञानासंभवात् तथा च व्याप्तिप्रत्यक्षकारणीभू-
यतर्कस्य कारणीभूतापाद्यापादकयोर्व्याप्तिज्ञानसंपादकत्वमेव तत्स्य तस्य प्रयोजकत्वमित्यभिप्रायेणाशंकते । नचेते
नविनेति तेन विना । व्यभिचारस्फूर्तेन न विना । तर्कस्यैव नावतारात् इति व्यभिचारदर्शनाभावेन तत्सत्वेन तापाद्यापा-

व्याप्तिप्रत्यक्षं प्रति तर्कस्य हेतुत्वं न संभवति व्याप्तेः तदहि त्वरितः क्वचित्तत्र तर्कं विना तत्रानन्यतर्कं विनैव व्याप्तौ दृश्यते सोपि
तर्कोपि व्याप्तिविना भवयोरदर्शनपरिग्रहः ननु तर्कानुतर्क्या व्याप्तिप्रत्यक्षव्याप्तेत्वैवं ज्ञातं तर्कजन्यव्याप्तिप्रत्यक्षे विक्रियते
तथाच न व्यभिचारः नच वास्तु षल्यादिना सोकर्यं वास्तुलादिव्याप्यता नावैज्ञाप्यत्वेकाणादिष्वभिप्रायेणोत्तोक्तं नचे
ति तद्भूतौ व्याप्तिप्रत्यक्षे व्यवां न जातिगतिमानाभावादिति दोषः नच तर्कजन्यतावच्छेदकतया तत्सिद्धिः तर्कस्य
हेतुत्वासिद्धेः ननु नादत्राघाव्यसामानाधिकरण्यमेव व्याप्तिः तत्प्रकारकयावत्स्वत्वविशेष्यकप्रत्यक्षमेवानुमितिज
नकं तत्रासन्निकृष्टव्यापकसामानाधिकरण्यमिकाप्याव्याप्तेष्वनिसामान्यलक्षणाप्रत्यासत्त्यैव संभवति साच प्रकृते नैक
सामानाधिकरण्यवृत्तित्वेन सामानाधिकरण्यलक्षणाने तज्ज्ञाने कसामानाधिकरण्यज्ञानात्मकसहचारभयोरदर्श
नेविनाने संभवतीति सहचारभयोरदर्शनं सपक्षविदूपयोगः व्यवेत्यभिमानेनावाचांकतो सामान्येति व्याप्तिनेकाधिकरण
वृत्तित्वरूपसामान्यत्वेन सामान्यज्ञानं सामान्यलक्षणाप्रत्यासत्तिरूपत्वं सर्वोपसंहारात् सर्वेषां साध्यसाधनादीनां
प्रत्यक्षभाननिष्पन्नत्वे अविनाभावग्रहः सकलसामानाधिकरण्यव्याप्तिप्रत्यक्षं प्रकृते न संभवतीति दोषः तथाच सर्व

हानावप्युपाधिकात्मस्य रूपकत्वमितिमंतव्यं तथा च तर्कं धूमादिकल्पने योग्यत्वात्र व्याप्तिप्रत्यक्षं प्रतितस्य हेतुत्वमेव भवति नि भा
वः ज्ञातमात्रस्येति भावः आहे नोत्पत्तस्य वत्तु तुल्यत्वन्यायेन कुतस्य पुनर्नाहं ज्ञानस्य बालस्य सर्वथा स्फुरितः प्रत्यक्षं तत्सादिः प्रत्यक्षेण ज्ञान
का यानुमितिः याचतिश्चयति जनिकानुमितिस्तत्प्रयोजनकं व्याप्तिज्ञानं तत्तु तर्कं विनैव संभवतीति सत्योः व्यवच्छेदानुसन्धानपः त्र
त्राघानुमितिरिष्टसाधनत्वव्याप्यनिष्ठान्वयव्यतिरेकप्रयोजकान्वयव्यतिरेकप्रतियोगित्वविशिष्टत्वनयानत्वमिति
व्याप्तिज्ञानजन्यासत्वनपानविशेष्यकेष्टसाधनत्वविधेयिका द्वितीयानुमितिरिष्टसाधनत्वव्याप्यद्विष्ठान्वयव्यतिरेकप्रयो
जकान्वयव्यतिरेकप्रतियोगित्वविशिष्टविषयपानत्वमितिज्ञानजन्या विषभक्षणाविशेष्यकद्विष्टासाधनत्वविधेयिका
सामान्यमुखी व्याप्तिश्च यद्यदिष्टान्वयव्यतिरेकप्रयोजकान्वयप्रतियोगि तदिष्टसाधनमित्याद्याकारावोध्या तथा चैव व्या
प्तिग्रहमूलको वह्निधूमादिव्याप्त्यंतरग्राहकतर्कोयता इति नानवस्थेति भ्रांतस्योपमानाशंकेति भावः यद्यप्येवं तस्यां
तिरेको न स्यात्तथा न तु तर्कस्य व्यभिचारात्तथापि व्याप्त्यंतरग्राहकतर्कप्रतिबंधेन व्याप्तिग्रहाभावमूलमितिमयोच्यते किंतु यथा
न्वयकं विनापि व्याप्तिग्रहस्तथा तत्रापि कश्चित्तर्कं विनापि व्याप्तिग्रहो भविष्यतीति संतानानवस्थेति यदि ब्रूयात्तदापि

चि॰ मा

तदेवेति यत्रैव व्याप्तिप्रसक्तेर्गगनत्वीयप्रतिबंधकाभावसंबंधकत्वेन निरुक्तभूयोदर्शनस्यावश्यमपेक्षितत्वमत एवेत्यर्थः॰ दर्शनेन॰ नि
रुक्तभूयोदर्शनेन॰ तन्निश्चयइति तस्याव्याप्तेर्निश्चयः प्रसक्तरूपोयस्माद्दिति सुत्तस्याव्याप्तिग्रहोपयोग्युपाधित्वसंशयाभावइत्यर्थः॰ तस्यो
पाधित्वस्य निश्चयोयस्माद्दिति निरुक्तस्योपाधित्वसंशयप्रभावइत्यर्थः॰ यथाश्रुतेऽनुपाधित्वनिश्चयस्यव्याप्तिग्रहप्रयोजकत्वेनानुक्तत्वया तत्क
यनेनाऽसंगत्यापत्तेरितिकेचित्॰ हेतुत्विति व्याप्तिप्रसक्त्योपयोगीत्यर्थः इत्येति॰ इति निरुक्तत्वेत्यर्थः॰ नवारसंख्यानियमः॰ नभूयस्त्वेति नि
श्चिता इतीत्याभूयोदर्शनं किमितिप्रत्त्वनावसरः॰ नवाननुगमः॰ नचाभूयस्त्वस्यत्रित्वादिरूपत्वेनैक्याभावाद्व्याप्तिप्रसक्तप्रयोजकता
वच्छेदकत्वासंभवः तथाचभूयोदर्शनानानांव्याप्तिप्रसक्तेप्रतिनिरस्तप्रतिबंधकोपाधित्वसंशयप्रतिबंधकसाध्याव्यापकनिश्चायकदर्श
नत्वेनोपयोगितेतिभावः॰ ननुनिरुक्तभूयोदर्शनस्यव्याप्तिप्रसक्तिप्रयोजकत्वं तत्रैवसंभवति यद्युपाधित्वसंशयस्यप्रतिबंधक
त्वं॰ तदेवनतुसंभवति॰ वस्यग्राह्याभावानवगाहित्वादित्याह॰ यद्यपीति स्वमस्य॰ षष्ठ्यर्थोविशेष्यत्वं॰ साध्याव्यापकत्वसाधनाव्या
पकत्वस्येति॰ स्वत्रप्रकारत्वेनेत्यर्थः नान्यस्येत्यादि॰ नान्यविशेष्यकव्याप्तिप्रसक्तेप्रतिसाक्षात्प्रतिबंधकत्वेपीत्यर्थः॰ तदाहितेति तस्य
वोऽस्येत्यर्थः॰ अभिचारसंशयेतत्प्रयोजकत्वेचव्यभिचारोन्नेयोपाधिमत्तासंशयजन्यत्वं॰ सउपाधित्वसंशयः॰ प्रतिबंधकः॰ साक्षात्प्रतिबंधकः

५५

नुल्लसाधनस्योपाध्याभाववज्ज्ञानिश्चयस्याऽव्याप्तिप्रसक्तेः प्रतिकारणत्वमेव नानागीकरणीयं यदर्थं भयोर्दर्शनाद्दरादिति भावः ननु तथा
पि निरुक्तधर्माणामुपाधित्वसंशयकाले साधनेपि सोपाधित्वसंशयस्योपाध्यावर्जितत्वेन तद्वृत्तीनामपि व्याप्तिप्रसक्त्याप्तसाध्यव्याप्तिग्रस
क्तेः प्रत्युपाधित्वसंशयाभावस्य हेतुत्वानावश्यकीकार्य्यौ· तथाच तत्संपादकत्वेन निरुक्तभयोर्दर्शनाद्दृत्तीभवच्छन्तीत्याशंकते· अथेति धर्मेति
णां· पदादीनां· उपाधित्वसंशये साध्यव्यापकत्वसाधनाव्यापकत्वशंकायां न व्याप्तिग्रहः· नव्याप्तिप्रसक्ते अनेनेति· अस्मात्वे
नोरित्यर्थः नादृशपदादीनामुपाधित्वसंशयदशायां व्याप्तिप्रसक्त्यानुत्पादादित्यावत्नः व्याप्तिज्ञानोपयोगीतिविशेषः तेषां सा
दृशपदादीनां· अनुपाधित्वज्ञाने· उपाधित्वज्ञानाभाव साध्याव्यापकत्वादीति· आदिना साधनव्यापकत्वस्य संग्रहः· ज्ञाने स
तीतिसंभवतीतिविशेषः निरुक्तभयोर्दर्शनाधीनसाध्याव्यापकत्वादिज्ञाने सति व्याप्तिज्ञानोपयोगितेषामनुपाधिज्ञानाभवस्संभव
तीतियोजनाबोध्या इतीति इतिकृत्वेत्यर्थः तदर्थं व्याप्तिग्रहोपयोग्यनुपाधित्वज्ञानाभावसंपादकसाध्याव्यापकत्वादिज्ञा
नार्थं· भयोर्दर्शनापेक्षा· निरुक्तभयोर्दर्शनाद्यादरः तथाचात्रोपाधित्वसंशयस्य व्याप्तिग्रहप्रतिबंधकत्वे कारणीभूताभावप्र
तियोगित्वमिति दिशा बोध्यं ननु एवं किंचेत्यादिना दूषणमुद्धृत्य सोऽकल्पात्कथं भयोर्दर्शनस्य व्याप्तिग्रहोपयोगित्वमत आह· अ

चिं॰ वा नत्वमिति। केवलान्वयिनि ज्ञेयत्वाधिकरणाद्यन्निष्ठतावच्छेदकेन समवायसंबंधावच्छिन्नप्रतियोगिताकाभावत्वाभाववन्निष्ठप्रतियोगित्वेन निरुक्तो-
भयाभावसत्त्वान्नाव्याप्तिरिति भावः। साध्यव्यापकतावच्छेदकस्वरूपसंबंधावच्छिन्नत्वं च [illegible] भावाभावनिष्ठप्रकारतायां प्रतिसं धूमवान्व-
५२ ह्नेरित्यादावयोगोल[illegible]हनिष्ठतावच्छेदकेन लत्वाभावनिष्ठप्रतियोगित्वेन निरुक्तोभयाभावसत्त्वादिति व्याप्तिवारणाय यावदिति। अन्य-
द्ध्याद्यनुभवं स्वयमूह्यं [illegible]वमतत्साध्यसमानाधिकरणाभावप्रतियोगितानवच्छेदकाया वृत्तो धर्मो यत्समानाधिकरणाभावप्रतियोगि-
तानवच्छेदकास्तत्वमेवानौपाधिकत्वमिति निष्कर्षो बोध्यः। अत्र प्रतियोगितयोरेकसंबंधावच्छिन्नत्वं विशेषणताविशेषावच्छिन्नत्वं वा
वाच्यं तेन न संबंधभेदमादाय दोषः विशेषणांतरप्रयोजनादिकं तु ऊहनीयं लक्षणांतरमाहायद्वेति। यत्संबंधेनेति यत्पदं साध्यता- ताम॰
वच्छेदकावच्छिन्नपरं तथा च यत्साध्यतावच्छेदकावच्छिन्नसंबंधितावच्छेदकरूपवत्त्वं यस्य साधनस्य साधनस्य। सा साध्यसंबंधिता। साध्य- तस्य ३
सामानाधिकरण्यरूपा। तत्साध्यनिरूपिता व्याप्तिरिति वाक्यार्थः। साध्यतावच्छेदकावच्छिन्नसाध्यसामानाधिकरण्यावच्छेदकहेतुतावच्छे-
व१ दकत्वं सति साध्यसामानाधिकरण्यं व्याप्तिरिति तन्निष्कर्षः वह्निमान्धूमादित्यादिस्थले धूमवान्वह्नेरित्यादौ लक्षणासत्त्वमतं च व्यदर्शयति स१

द्वि२

रणात्यंताभावप्रतियोगितावच्छेदकधर्मवत्त्वात् तथा च धूमवान् वन्हेरित्यादौ यावदंतर्गतैतादृशोपाध्यभावे वन्हिसामानाधिकरण्याभावाभावान्नाव्याप्ति
व्याप्तिरिति भावः इदं चार्थं तेपक्षादिसाधारे साध्यव्यापकस्याकाशाभावस्याभावे आकाशे वा अन्नसामानाधिकरण्याभावाल्लक्षणासंगतिर्वोध्या॥ एतेन
यावत्त्वे साध्यव्यापकतावच्छेदके तदवच्छिन्नेवाविशेषणं नाद्यः यावंतिसाध्यव्यापकतावच्छेदकानि तादृशयावदवच्छिन्नैकाभावाप्रसिद्धेः नहि वन्ही
यः वन्हिमान् धूमादित्यादावसंभवापत्तेः वन्हिव्यापकानि यावन्त्यवच्छिन्नाभावस्य केवलान्वयितया तस्य धूमसमानाधिकरण्यत्वात् न च साध्य
व्यापकं यावत्प्रत्येकं तदभावकूटासामानाधिकरण्यं तदिति वाच्यं॰ तत्तद्व्यक्तित्वावच्छिन्नस्यापि यावदंतर्गततया तदभावकूटाधिक
रणाप्रसिद्धेः तादृशाकाशाभावाभावाधिकरणाप्रसिद्धेः प्रतियोगिनि यावत्त्वानिवेशपक्षेऽपि तदभावे समुदायत्वनिवेशो गौरवान्नेति दूष
णं परास्तं न चाकाशाभावाभाववानंगीकर्त्तेन वीनन्ये केवलान्वयिप्रसाधितात्व सद्भिमिति वाच्यं साध्यव्यापकतावच्छेदकधर्मावच्छि
न्नाभावे हि यावति हेतुसामानाधिकरण्याभाव इति नार्थः परं त्वभाववह्निपक्षे त्वधिकरणाद्यनिमादच्छेदकेयावत्किंचित्प्रतियोगिताकत्व
निरूपकत्वसंबंधेन प्रतियोगित्वमिति यावत् साध्यव्यापकताघटकसंबंधावच्छिन्नत्व साध्यव्यापकतावच्छेदकधर्मावच्छिन्नत्वोभयाभाव

रणसाध्याधिकरणाव्यक्तिज्ञानं विज्ञानं संभवतीति साध्यसाधनाधिकरणानेकव्यक्तिज्ञानरूपसंबंधग्रहोपायस्य भूयोदर्शना
पेक्षास्यैवेत्यभिप्रायेणाशंकते । न चेति अनौपाधिकत्वज्ञानं तु साध्याभाववत्ताश्रयः । व्याप्तिज्ञानहेतुः । व्याप्तिप्र
त्येहेतुः । तद्देशकालतत्त्वावच्छिन्नेत्यादि । तद्देशतत्कालावच्छेदेन साध्यसाधनाधिकरणपङ्क्तिविशिष्टव्यक्तिवृत्तित्वेन
ज्ञातघटादीनामित्यर्थः । उपाधित्वशंकानिरासश्च । तादृशघटपटादीनां साध्यव्यापकत्वसाधनाव्यापकत्वशंका
निरासश्च । कस्यचित् । साधनाधिकरणपङ्क्तिविशिष्टव्यक्तिवृत्तित्वादेः साधनव्यापकत्वज्ञानेन । साधनाधिक
रणानेकाधिकरणत्वज्ञानेन । कस्यचित् । साध्याधिकरणपङ्क्तिविशिष्टव्यक्तिवृत्तित्वेन ज्ञातघटादेः साध्याव्यापक
त्वज्ञानेन । स्वानधिकरणसाध्याधिकरणकत्वज्ञानेन नैवं तादृशघटादावुपाधित्वशंकैव नावतरति । ननु तद्दे
शकालावच्छेदेन तत्र घटे ज्ञाते विभिन्नदेशकालावच्छेदेन तत्रैव घटाभावस्य ज्ञानेन साध्यसमानाधिकरणाभावप्र
तियोगित्वज्ञानादिति वाच्यं अव्याप्यवृत्त्युपाधिसंग्रहाय हि साध्यसमानाधिकरणाभावे निरवच्छिन्नत्वविशेषणात्

दी॰ वा॰

द्रलेद्रव्यत्वगुणादिस्योसंयोगाद्रेरुपाधित्ववारणाय साधनसमानाधिकरणाभावेपि निरवच्छिन्नत्वं विशेषणांरेयमेत
द्वाथनाप्यवत्ताहेत्वादौ सत्त्वकमित्यभिप्रायः तत्त्वं॰ साधनव्यापकत्वज्ञाने साध्याव्यापकत्वाज्ञाने भयोरज्ञानेविनेति
साधनाधिकरणानेकव्यक्तिज्ञानंविनातावानधिकरणसाध्याधिकरणज्ञानंविनेत्यर्थः तथाचविशिष्टज्ञानंप्रतिविशे
षणज्ञानस्यहेतुत्वेनपोपाधित्वमेवप्रतिबंधकसाधनव्यापकत्वज्ञानेसाध्याव्यापकत्वाज्ञानंचसाध्यसाधनाधिक
रणयत्किंचिद्व्यक्तिघटाद्यनधिकरणसाध्याधिकरणज्ञानसाधनाधिकरणानानाव्यक्तिज्ञानरूपमुभयोरज्ञानेदिवम
विष्यतीति इपेक्षावतरूपकौतिभावः यपोग्याप्यभिव्याप्तिरोकस्येति॰ व्यतत्र पक्षेच्यविषयत्वमनवपक्षस्यानुमानाधीन
ज्ञाने। तथाचोपाध्यभावस्यपक्षेन्नस्यानुमानाधीनत्वेनव्याप्तिज्ञानजन्यत्वेनेतिवाक्यार्थः अनवस्थानादिरिति॰ उपा
ध्यभाववत्ताज्ञानजनकव्याप्तिज्ञानापोपाध्यभाववत्ताज्ञानांतरमपेक्षितंतस्यापिव्याप्तिज्ञानजन्यत्वेनतद्व्याप्तिज्ञा
नायाण्युपाध्यभाववत्ताज्ञानांतरापेक्षापातमनवस्थानादिरित्यर्थः तथाचानवस्थादूषणेनव्याप्तिज्ञानस्यकदाप्यन

१५०

तद्विघटनत्वं । व्यभिचारसंशयप्रयोजकत्वं । तच्चोपाधित्वसंशयः । प्रतिबंधप्रयोजकोपाधित्वसंशयनिरासः आवश्यकमिति । तथा चोपा
धित्वसंशयानिरासे तत्प्रयोज्यव्यभिचारसंशयोत्पत्त्या व्याप्तिग्रहप्रतिबंधस्स्यादिति तन्निरासे आवश्यक इति भावः । अयोग्योपाधी
त्यादि । अयोग्योपाधित्वसंशयाधीनेत्यर्थः । तदधीनत्वं तत्प्रयोज्यत्वं तथापि योग्यधर्मे साध्याव्यापकत्वादिग्रहसत्त्वे संभवेनोपाधित्वसंश
यानुत्पत्त्या तदधीनव्यभिचारसंशयनिरासेपि । असच्छेदात् । उच्छेदासंभवात् । तच्च । अयोग्यधर्मे उपाधित्वसंशयस्य । तदयोग्यदर्शनान्न । न
तज्ज्ञानकसाध्याव्यापकत्वादिग्रहसत्त्वात् । नाप्यनुमानात् । नापि साध्याव्यापकत्वादिसाधककानुमितेः । इत्युक्तं । अनवस्थापातादिति ग्र
न्थेनोक्तमायं । अत्रायमभिप्रायः । उपाधित्वेनाभिमतो धर्मो द्विविधः । योग्योऽयोग्यश्च । तत्रायोग्यधर्मे साध्याव्यापकत्वग्रहसत्त्वे संभवेन त
न्निरासेप्ययोग्यधर्मे कथं तन्निरासः तस्यायोग्यत्वेन साध्याव्यापकत्वादिग्रहसत्त्वासंभवेनानुमितिरूपमेव तद्ग्राह्यं । तदपि न संभवति साध्या
व्यापकत्वानुमितिजनकव्याप्तिज्ञानप्रतिबंधकव्यभिचारसंशयप्रयोजकोपाधित्वशंकानिरासार्थं प्रनत्तत्रापि साध्याव्यापकत्वादि
ज्ञानापेक्षायामनवस्थानात् । तस्मात्साध्याव्यापकत्वज्ञानाभावेनोपाधित्वसंशयानिरासे सर्वत्र व्यभिचारसंशयोत्पत्त्या व्याप्तिज्ञा
नासंभवेन व्यभिचारसंशयस्य व्याप्तिज्ञानप्रतिप्रतिबंधकत्वमेव न वाच्यं । तथा च कुतस्तत्र अयोग्यदर्शनापेक्षेति । न च यत्र स्वतस्सि

त्विएवोपाधिशंकाविरहस्तत्रभयोर्दर्शनापेक्षानास्येवेनिस्फुरत्तांदूषणंविहायैवेत्तत्सर्पतानुधावनेनकिंबीजमितिवाच्यं यत्र:
क्वापिभयोर्दर्शनस्यव्याप्तिग्रहेऽनपेक्षितत्वमित्यत्राहेऽधुनापत्तसर्पतानुधावनमितिभावः पूर्वभयोर्दर्शनस्यस्वजन्यसंस्काराद्वारा
हेतुत्वंसामान्यतोव्याप्तिप्रसक्तत्वावच्छिन्नप्रतिरूपितमित्यनोत्तसामान्यतःप्रसक्तत्वेनतत्कार्यतावच्छेदकंतद्व्याप्यप्रसक्तत्वेवेतिविवक्ष
त्वदूषयति अपिचेति नवहिरिंद्रियसहकारीति नवहिरिंद्रियस्यैवसहकारीत्यर्थः यथाश्रुतेबहिरिंद्रियसन्निकर्षसत्वदशायांबहि
रिंद्रियसहकारित्वेभयोर्दर्शनजन्यसंस्कारस्यमनःसहकारित्वेबाधकाभावेनतद्व्याप्यांशेविनेतिग्रन्थासंगेत्यापत्तेः तद्व्याप्यांशेविनापिबहि
रिंद्रियसन्निकर्षविनापि सहचारस्मृतिजनकत्वात्साध्यसाधनसहचारस्मृतिजनकत्वात् व्याप्तिग्रहात मनसाव्याप्तिप्रसक्तजपिनात तथा
चमनसाव्याप्तिप्रसक्तत्वनेनस्यसहकारित्वसंभवेनबहिरिंद्रियेतरसहकारित्वमनुपपन्नमेवेतिभावः अनेनतद्व्याप्यप्रसक्तत्वेन
त्कार्यतावच्छेदकमितिनिष्कृष्टोपकल्पसदूषितोभवतीतिबोध्यं नापिमनसइति नमनसोपीत्यर्थः अत्रबहिरिंद्रियसहकारीति
वाक्यस्यसहकारित्वांशस्यानुषंगः इंद्रियादिवदिति यथेंद्रियादेःप्रमाकरणत्वंतथातज्जन्यसंस्कारस्यसंस्कारजन्यस्मरणस्य वा
प्रमाणेनान्तर्भावोपजेत्यर्थः प्रमितिकरणत्वापत्तेरितिपाठःतत अन्यथाऽक्षमप्रमाणचतुष्टयातिरिक्तप्रमाणस्यापि प्रसिद्ध्यासंगत्वा

पत्तेः तत्राप्युमितेस्संस्कारजन्यत्वस्यातिव्याप्तेरेतदह · तज्जन्यस्मरणान्यत्वेति परस्पराधारणं सहकारिणां यस्माद्यमनो बहिरिंद्रियं चाप्रमाणं तेन न
मितिरितरेवप्रमाणानामिति नियमादिति शेषः केचित्तु न बहिरिंद्रियसहकारिः नबहिरिंद्रियमात्रसहकारि नमानसेनव्याप्तिप्र
मसत्तावच्छिन्नप्रतिजनकत्वमिति यावत् · तच्चापारं विनापीति · भूयोदर्शनापीति · भूयोदर्शनजन्यसंस्काराहपव्यापारं विनापीत्यर्थः
व्याप्तिग्रहात् · मनसा व्याप्तिग्रहं प्रसंगादाहस्याद्वा प्राभाकरमते व्याप्तिग्रहोपायप्रदर्शयितुमुपसंहरति · तस्मादिति व्याप्तिप्रस
सम्प्रति भूयोदर्शनपदार्थस्यैकाकालत्वासंभवादित्यर्थः परिशेषेणेति साध्यसाधनसंबंधविषयत्वप्रयोजकाप्रयुक्तविषयित
त्वेनेत्यर्थः · न तु भूयोदर्शनाग्राह्यत्वेन तिग्राह्यत्वेनेत्यर्थः तथा सति तत्तद्भूयोदर्शनरूपग्रहविषयत्वार्थकत्वे व्यक्तघव्याप्ते
तद्विषयत्वस्यैव सत्वेनासिध्यापत्तेः · भूयोदर्शनत्वावच्छिन्नजन्यग्रहविषयत्वार्थकत्वे प्राभाकरमते भूयोदर्शनत्वावच्छिन्नग्रहवि
षयत्वरूपप्रतियोग्यप्रसिद्ध्या विशिष्याप्रसिद्धेः · उपाध्यभावत्वविशिष्टेत्यत्र साध्यसमानाधिकरणेति तत्र समाराध्यसाध्यसा
धनविषयित्वप्रयोजकप्रयुक्तविषयताकस्य सहपदेन तोहपाध्यभाववत्त्वसत्वेन तत्र सहचारदर्शनादावपि सत्वेन व्यभिचारवारणाय ॥

त्रि·वा

यत्नमत्रेष्ठपगर्भता· इत्थं चेत्तन्न तादृशविषयिताप्रयोजकोपाधिज्ञानादिप्रयुक्तविषयताकत्वसत्वे न हेतोरभावान्न व्यभिचारः सहचारद-
र्शनगम्येति प्राथमिकसहचारदर्शनगम्येत्यर्थः सा· व्याप्तिः तथा च प्रयोगः व्याप्तिः प्राथमिकसहचारदर्शनगम्या· साध्यसाधनसह-
चारादिविषयिताप्रयोजकाप्रयुक्तविषयिताकत्वात्साध्यादिवदित्यनुमानेन साध्यसाधनसहचारज्ञानेऽव्याप्तिविषयकत्वसिद्धेः· सा-
ध्यसाधनसहचारविषयित्वप्रयोजिका सामग्री व्याप्तिविषयित्वप्रयोजिका व्याप्तिविषयत्वव्याप्यविषयित्वप्रयोजकसामग्रीत्वा-
द्यापद्विषयित्वव्याप्यविषयित्वप्रयोजिका सामग्री सा तद्विषयित्वप्रयोजिका यथा साध्यविषयिताव्याप्यविषयित्वप्रयोजिका
सामग्रीत्यनुमानेन साध्यसाधनसहचारविषयित्वप्रयोजकसामग्र्या एव व्याप्तिग्राहकत्वे सिध्यतीति एतेन सहचारदर्शनगम्य-
त्वेन सहचारदर्शनजन्यज्ञानविषयत्वे· साध्यसाधनसहचारज्ञानस्यैव व्याप्तिज्ञानत्वेन मीमांसकमते तत्र तज्जन्यत्वाभावात्· नापि
व्या सो साध्यसाधनसहचारज्ञानविषयत्वमेव तत्त्वे· तथा सति तद्ध्वस्तापनस्य व्याप्तिग्रहोपायानिरूपणानात्मकतयोपाप-
त्तिसापातद्ध्वस्तापनेऽर्थान्तरत्वापत्तेरिति निरस्तं केचित्तु सहचारदर्शनगम्यत्वं च साध्यसाधनसहचारज्ञानत्वव्यापकावि-

षयित्वनिरूपकत्वमेव । सा व्याप्तिः तथा च व्याप्तिः साध्यसाधनसहचारज्ञानत्वव्यापकः विषयिता निरूपिका साध्यसाधनस
हचारग्राहकसामग्रीत्वव्यापकत्वग्राहकसामग्रीत्वकत्वादित्यनुमानात् साध्यसाधनसहचारविषयकयवज्ज्ञाने व्याप्तिविषयकत्वे
मित्येव साध्यसाधनसहचारग्राहिका सामग्री व्याप्तिग्राहिका व्याप्तिविषयकज्ञानसामग्रीत्वादित्यनुमानात् साध्यसाधनसहचारग्रा
हिकासामग्र्येव व्याप्तिग्राहिकेति भावः स्यादुः तन्मत । तादृशसामग्रीत्वव्यापकत्वग्राहकसामग्रीत्वकत्वासिद्ध्यत्वस्यैकस्याभावेन
विशिष्टाभावे शरीरे न व्याप्यत्वादित्यग्रहणो व्याप्तिग्राहकसामग्रीत्वेन तादृशसामग्रीत्वव्यापकत्वमिति यो तस्य विनिवेशितया तादृशसामग्रीत्वे
पि न व्याप्यत्वमिति ध्येया तादृशसामग्र्याएव व्याप्तिग्राहकत्वमिति सिद्धं भवेन द्वितीयानुमानस्य वैयर्थ्यापत्तेः द्वितीयानुमानेन सिद्धसाध
नात्वेति ननु व्याप्तेर्ज्ञानमुपाध्यभावत्वप्रकारकमेव । तच्चोपाधिज्ञानं विना न संभवति उपाधित्वज्ञानं च साध्यव्यापकत्वज्ञाने । तथा
च व्याप्तिविषयिताया साध्यसाधनसहचारविषयित्वाप्रयोजकोपाधिज्ञानप्रयुक्ततया इति चेत् स्वीकार्यमपि हीति । तथा हि
सहिता उपाध्यभाव इति । उपाध्यभावविशिष्टसाध्यसामानाधिकरण्यं व्याप्तिरित्यर्थः तेन प्राभाकरमते गौरवत्वादित्यादिवि
त्वहेतौ उपाधिविरहे पि न अतिव्याप्तिः केवलाधिकरणमिति । अधिकाणोक्तावतिप्रसक्तेः भावत्वस्यार्थः ननूपाध्यभावस्यैकैव जाय

कारणरूपत्वेऽत्रोपाधिर्नास्तीत्यस्याधारणेऽपभावप्रसंयोजनस्यापि इत्यत आह: तत्काले तत्संबंधो वेति तेनाधिकरणेन सह संबंध
स्तत्कालस्योपाध्यनधिकरणकालस्यैककालीनत्वादिसंबंधो वेत्यर्थः नन्विदानीमत्रोपाधिर्नास्तीति प्रतीतिः कालविषयकत्वे
पि केवलमत्रोपाधिर्नास्तीति प्रतीते साध्यसाधनसंबंधविषयकप्रतीतेर्वा कालविषयकत्वविषयकं ज्ञानं विषयतासंबंधेनाधि
करणमेव तच्च ज्ञानमुपाध्यभावपदार्थ इति यावत् ज्ञानस्य स्वप्रकाशत्वात्तथा ज्ञानस्याप्युपाध्यभावरूपत्वात्प्रतीतेर्भानार्थं ज्ञानान्तरं ना
पेक्षत इति संचितं ननु एवमुपाध्यभावत्वेन रूपेणोपाध्यभावप्रकारकसाधनविशेष्यकज्ञानं व्याप्तिरिह तत्साध्यसाधनसहचारज्ञानमेव
व्याप्तिः उक्तरीत्याशिष्टरूपहेतोरसिद्ध्यापत्तेः तादृशव्याप्तिस्वरूपस्यानेऽधिकापेक्षायामावश्यकत्वात् नहि तेषां व्यभिचारिण्य
तिव्याप्त्यापत्तेः तत्रापि साध्यसाधनसहचारज्ञानस्यापि सत्त्वादिति चेन्नैवं साधननिष्ठोपाध्यभावस्य साधनविशेष्यकज्ञानरू
पतोपगमात् व्यभिचारिणि साधने उपाध्यभावाभावेन तद्ज्ञानस्य तद्रूपतासंभवात् तेद्येति उपाध्यभावरूपाधिकरणादिकं चेत्स
र्थः वस्तुगत्या प्रथमसंबंधदर्शने व्यगतमेव विषयीभूतमेवेत्यर्थः तथा च वस्तुगत्या जन्मप्राथमिकसाध्यसाधनसहचारदर्श
नविषयीभूतमेवोपाध्यभावरूपाधिकरणादिकमित्यर्थः प्राथमिकदर्शनेन नितरां तु यान्नपाठेऽवगतमेवेत्यस्य विषयीकृतमेवेत्यर्थः एम-

अधिकरणादिरूपव्याप्तिस्वरूपस्यप्राथमिकदर्शनगम्यत्वान्नतथेत्यर्थभूयोदर्शनापेक्षेसेवकारणार्थः नचोपाध्यभावस्यतत्कालरूप
त्वपक्षेकथंचाभूयोदर्शनविषयत्वंतस्येतिवाच्यं प्राभाकरमतेकालस्यघटादिस्थितिविषयत्वस्वीकारेणानुपपत्त्यभावात् ननूपाध्य
भावोनाधिकरणात्मा अत्रोपाधिर्नास्तीतिप्रतीतेः तथाचोपाध्यभावस्यप्राथमिकसाध्यसाधनसहचारदर्शनविषयत्वंमास्त्व
वेत्यतआह नचेति नहीत्यर्थः अधिकः अधिकरणात्मकः तदभावः उपाध्यभावः अतिप्रामाणिकत्वेपि नचोक्तप्रतीति
रेवप्रमाणमितिवाच्यं नैयायिकमतेपितादृशप्रतीतिविषयस्याभावमात्राधिकरणकाभावस्याधिकरणरूपत्वस्वीकारेण
द्वयोर्मतेभेदः नैयायिकमतेभावमात्राधिकरणकाभावस्याश्रयरूपताप्राभाकरमतेतुयत्रतादृशप्रतीतिस्तद्रूपताभाव
स्यस्वीक्रियतइति ननूपाध्यभावप्रत्यक्षेप्रतिप्रतियोगितावच्छेदकप्रकारकप्रतियोगिज्ञानस्यहेतुतयाऽधिकरणरूपोपा
ध्यभावप्रत्यक्षमुपाधिज्ञानमपेक्ष्यतदुक्तानुमानेबाधितोबाधस्तेवेत्यतआह नचेतिप्रतियोगिज्ञानं प्रतियोगितावच्छेदक
प्रकारकप्रतियोगिज्ञानं अधिकरणादिज्ञाने अधिकरणतावच्छेदकरूपेणोपाध्यभावत्वरूपाधिकरणप्रसक्षे तत्रस्यादि
ति अधिकरणतावच्छेदकरूपेणोपाध्यभावत्वरूपाधिकरणप्रत्यक्षेनस्यादित्यर्थः तथाचाभावत्वप्रकारकप्रत्यक्षस्यावधि

वा·

न्त्वप्रसंगेव प्रतियोगितावच्छेदकप्रकारकप्रतियोगिज्ञानस्य हेतुत्वं न केनचिद्रूपेणाभावप्रसंगस्य सत्वावच्छिन्नं प्रति अन्यथेदं त्वादि
नाभावप्रसंगेन तद्विनानस्यात्· एवं च प्रकृते उपाधित्वप्रकारकोपाधिज्ञानं विनापि धूमत्वेन रूपेणोपाध्यभावस्य साध्यसाधन
सहचारप्रसंगे भाने न किंचिद्बाधकमिति नोक्तानुमाने बाधादिदोष इति भावः·· एवं चेति उपाधिज्ञानं विनाप्यधिकरणतावच्छे
दकधूमत्वरूपेण धूमरूपोपाध्यभावान्न व्याप्तिप्रसंगे बाधकाभावे चेत्यर्थः· उपाध्यभावे· अधिकरणतावच्छेदकरूपेणोपाध्यभावा
न्माधिकरणे ज्ञाते ज्ञातुं किंचिन्नावशिष्यत इति येन तद्ज्ञानार्थं प्रयोगादीनापेक्षा स्यादिति भावः· नन्वेवमुपाधिज्ञानशून्यका
लेप्यत्रोपाधिर्नास्तीति व्यवहारापत्तिः· तदानीमपि तज्जनकस्योपाध्यभावरूपस्य व्यवहर्तव्यज्ञानस्य सत्वादित्याशंक्य निरा
करोति· उपाध्यभावव्यवहारकोपाधिज्ञानमपेक्ष्यते परिमाणत्वेदं दृष्टांते न दृश्यति दीर्घत्वेपि यथावैं तथेहापीत्यर्थः· तथा
चव्यवहारं प्रति न व्यवहारं प्रति न व्यवहर्तव्यज्ञानं कारणमपि तु व्यवहर्तव्यतावच्छेदकप्रकारकज्ञानं + धिज्ञानाभावेपि केन
चिद्रूपेणावधित्वरूपपरिमाणप्रसंगे ज्ञातेप्ययमस्मादीर्घ इति व्यवहारोऽवधिज्ञानापेक्षा + ने· व्यवहर्तव्यतावच्छेदकं च प्रकृते तु
पाध्यभावत्वेन तत्प्रकारकज्ञानं तूपाधित्वप्रकारकज्ञानं विना न संभवतीति कारणाभावात्तदानीं न तादृशव्यवहार इति भावः·

एम·

५

नैवमिति एवं· आहेत्त्वस्तकद्दर्शनगम्यत्वे एतस्मत्संबंधत्वमेति· एतस्य निष्ठवन्हिसामानाधिकरण्यज्ञानत्वेस्यर्थः·· तत्त्व
त्वं च धूमनिष्ठवन्हिसामानाधिकरण्यज्ञानकाले सोपाधित्वज्ञानकालीनत्वेनैवाध्यं तथाच यथा एतस्य निष्ठवन्हिसामानाधिकर
ण्यज्ञानं सोपाधित्वज्ञानकालीनत्वेनानुमित्यजनकं तथा धूमनिष्ठवन्हिसामानाधिकरण्यज्ञानमपीति तत्तेषामिमतावतां मतेऽनुमि
तिस्यादिति भावः· अत्र योग्यसन्निकृष्टहेतुकस्थले उपाध्यभावत्वेन व्याप्तिप्रसंगकारणं· अन्यत्र तु उपाध्यभावत्वेन व्याप्तिज्ञानेन
तु केन चिद्रूपेण व्याप्तिज्ञानमितिमात्रानुपपत्तिरिति प्रदर्शयन्तु उपाध्यभावत्वेन व्याप्तिर्लौकिकप्रत्यक्षसामग्रीं प्रदर्शयति· उपाधि
स्मारणे सतीत्यादिना। उपाधिस्मारणे सतीति· उपाधिज्ञाने सतीति· उपाधिश्च न व्याप्यापक्षस्तु इंद्रियसंनिकर्षो दृश्यनयोग्यत्वे न तादृशमित्रा
भिस्तकत्वादिनन्तूपलंभकाविद्धेतुविशेष्यकोपाधिप्रकारकप्रत्यक्षजनकाविततत्वमवधानेचेति· उपाध्यनुपलंभसाहित्यस्य: उ
पाधिसत्वज्ञानाभावविशिष्टस्य· केवलाधिकरणज्ञानस्य· उपाध्यभाव उपाधिकरणज्ञानस्य· अनुमितिहेतुत्वात· योग्यसन्निकृ
ष्टहेतुकस्थलीयानुमितिप्रयोजकत्वात तथाचोपाधिज्ञानकालीनस्योपाधितद्व्याप्यतादृहेतुविशेष्यकोपाधिप्रकारकप्रत्यक्षज
नकपावकारणकलापकालीनसोपाधिसत्वज्ञानाभावविशिष्टस्योपाध्यभावात्मकहेतुज्ञानस्योपाध्यभावत्वप्रकारकव्याप्तिप्र

प्रसक्तेन न नद्दाणस्यानुमितिहेतुतयापक्षेणैतादृशसामग्र्यभावेन तादृशप्रत्यक्षाभावाद्वाऽनुमित्यापत्तिरिति भावः ननु नद्दाणस्यानुमि
तिहेतुत्वे तन्निरूपकहेतुकादिज्ञानेऽनुमितिर्न स्यात्तत्र निरुक्तसामग्र्यभावेन तदभावादित्यत आह तद्व्यवहारेति व्यवहारहेतुरेव हेतुर्प
र्यन्तिमस्यामपरस्तोऽपि वृद्धोक्तिहि गुणः अनुमितेर्व्यवहारहेतुहेतुकत्वादेतदर्थः तथा च तादृशज्ञानादिज्ञाने विग्व्यवहारस्यापत्त्यनुपपत्तिरि
ति न तत्त्वोपाध्यभावत्वेन रूपेणोपाध्यभावप्रत्यक्षे परिशेषोपाध्यभावत्वेन रूपेणोपाध्यभावज्ञाने सैव हेतुत्वेनैव तत्रानुपि
तिस्तेन भवतीति भावः इत्थं च तत्कारतादृशव्यवहारहेतुत्वमनुमितिहेतुत्वं चोपाध्यभावत्वप्रकारकज्ञानस्य समुचितो नीतिनानुप
पत्तिरिति मतमेव चकारेण वार्थपूर्वोक्ताशयमस्य च कटरिको वित्त-ष्ठ अत्र तद्व्यवहारहेतुत्वादिति समाधाने व्यापकमताभिप्रा
येण प्राभाकरस्य मतेऽत्वसंसर्गाग्रहस्यैव व्यवहारहेतुत्वादिति मतमेव कश्चित्तु नन्वेवं केवलाधिकरणज्ञानादनुमितिर्भवत्वेके
वलाधिकरणज्ञानमात्रं दृशायामुपाध्यभावव्यवहारस्तत्र तापत्तावित्यत आह व्यवहारेति उपाध्यभावव्यवहारहेतुत्वादेवेति
व्याचक्रुः तन्न चिन्त्यं उपाध्यभावव्यवहारस्तन्नास्ति प्रमेयत्वादिना तादृशव्यवहारं प्रत्युपाध्यभावत्वप्रकारकज्ञानस्य हेतुत्वात्
प्राक्प्रदर्शितत्वेनाभ्युपेयत्वेनानुच्छेदात् नन्वेवमिति एवं अधिकरणतत्त्वोपाध्यभावात्मकत्वाभिग्रहे साधनमहत्त्वाद्याहक

।।५०

पिरिकान्तनपेक्षायां प्रथमदर्शनेन · प्रथमधूमादौ द्वित्रिसन्निकर्षेण ॥ दृश्यते ज्ञायतेऽनेनेति व्युत्पत्तेः · व्याप्तिनिश्चयात् · प्राभाकरमते
विशिष्टबुद्धिं प्रति विशेषणज्ञानस्यापेक्षा हेतुत्वेन साध्यसाधनसहचारनिश्चयकाल एव व्याप्तिनिश्चयसंभवात् विशेषदर्शने सतीति
धूमे व्याप्यत्वाद्व्याप्तिप्रकारकनिश्चये सतीत्यर्थः रासभादिसंशयवदिति रासभादिविशेषदर्शनशून्यकाले यथानुभवसिद्धो रासभा
दिसंशयस्तथानुभवसिद्धो योऽधूमादौ वह्निव्याप्यत्वसंशयस्तस्य नस्यादित्यर्थः तथा च रासभादिविशेषदर्शनशून्यकाले रासभादि
संशयवत् धूमरूपव्याप्तिनिश्चयकालेऽपि धूमे वह्निविकल्पितव्याप्तिसंशयस्यानुभवसिद्धस्यानुपपत्त्या व्याप्तिग्रहे साध्यसाधनसह
चारग्राहकातिरिक्तस्यावश्यमपेक्षणीयत्वेन निरुक्तोपीशेषानुमाने सिद्ध्यादिदोषस्तदवस्थ एवेति भावः केचित्तु विशेषदर्श
ने सतीति यथा वह्निव्याप्यत्वस्य विशेषदर्शने सति रासभादौ न वह्निव्याप्यत्वसंशयस्तथेत्यर्थः · तत्संशय इति धूमादौ वह्निव्याप्यत्व
शेषसंशय इत्यर्थः तद्वदिति शेषः · अत एवाग्रे मयेति संगच्छत इति व्याचक्षुः अत्र व्याप्तित्वरूपप्रकारकसंशय इत्यर्थः तद्वदिति शेषः · अत्रोप
पाभावोपाधौ तेऽपाध्यभावत्वावच्छिन्नविशिष्टसाध्यसामानाधिकरण्यप्रकारकसंशयाभावोपाधौ ते वा · तत्र द्वितीयेपि उपाध्यभावत्व
प्रकारकप्रत्यक्षजनकोपाधिज्ञानघटितोपाध्ययोग्यत्वरूपत्वे भ्रमशून्यकालीनसाध्यसाधनसंबंधग्रहे जनिमायाघते तादृशयोग्यानुपल

न समव्याप्नोतीत्यनेन साध्यसाधनसंबंधग्राहोऽनंगा॰ तत्र प्रथमकल्पे साध्यसाधनसहभावसहचारग्रहस्यैव व्याप्तिस्वरूपनियतत्वेन क
ग्रहणत्वोक्तसंशयाभावापादनेऽदृष्टापत्तिरूपसमाधानस्यैव नापि ज्ञातेऽशक्यत्वेन तदनुत्कोद्धितीयकल्पोक्तकल्पद्वयेऽक्रमेणाप्य
माधानद्वयमाह व्याप्तिज्ञानोत्तरमित्यादिना व्याप्तिज्ञानजनकधूमादीन्द्रियसन्निकर्षोत्तरमपीत्यर्थः ज्ञानेयेऽनेनेति व्युत्पत्तेः स्व
त्वपक्षव्याप्तिग्रहो व्याप्तावपीत्यत्र विग्रम॰ न एवेति॰ एवकारस्त्वोपाधिविसेनतरं योऽसः विद्यमाने॰ ज्ञायमानेऽहेतावुपाधित्वेनोपा
धिर्वेव मया न ज्ञात इत्यर्थः॰ एवकारस्त्वोपाधिविसेननतरं योऽसव्याप्याव्योपि न निश्चित इति इत्यादि॰ इतिहेतुत्वे इत्यर्थः शंकया॰ व्याप्यप
निश्चयोगि संशयस्योपाध्यभावत्वप्रकारकनिश्चयाभावादिघटितसामग्र्या॰ गृहीतेति व्याप्यत्वावपीति व्याप्तित्वरूपनिश्चयेऽपीत्यर्थः॰ सं
शयः॰ उपाध्यभावत्वावच्छिन्नविशिष्टसाध्यसामानाधिकरण्यप्रकारकसंशयः॰ अनुपपन्न इति शेषः किं शब्दस्यात्रान्वयः॰ त
थाचोक्तसंशयः किमनुपपन्नोऽपि तु नानुपपन्न इत्यर्थः इत्थं च ज्ञायमानेऽहेतावुपाधित्वेनोपाधिर्वेव मया न ज्ञात इति कृत्वा उपाध्य
भावत्वेन रूपेण व्याप्तिसंशयसामग्र्या उपाध्यभावत्वप्रकारकनिर्णयाभावादिघटितयोपाध्यभावत्वेन व्याप्तिसंशयापादिकाऽध एम
मादीन्द्रियसन्निकर्षजन्यव्याप्तित्वरूपनिश्चयेऽपि नानुपपन्न इति समुदायार्थः तथा चोपाधित्वेनोपाधेर्ज्ञानमात्रेण तदुपाध्यभावत्वप्र

प्रकारकनिश्चयं प्रतिप्रतिबंधकाभावात्तादृशसंशयोनानुपपन्न इतिभावः नन्वेवं सति निरुक्तसंशयनिवृत्त्यर्थमुपाध्यभावत्व
प्रकारकज्ञानस्यावश्यमपेक्षणीयत्वेन तत्र भूयोदर्शनाद्यपेक्षावैतत्तेन तादृशाशंक्यतन्निवर्त्तकोपाध्यभावत्वप्रकारकज्ञानेन तदपेक्षायामपि
व्याप्तिग्रहोपयुक्तसकृद्दर्शनगम्यत्वेन निर्णयाद्यमेवेत्याह अत इति व्याप्तिग्रहपनिश्चयकालेपि निरुक्तसंशयस्यानुभाविकत्वादित्यर्थः
तत्र साधने उपाधिनासहचारे उपाध्यभावत्वप्रकारकनिर्णयसहचारे अपनीयते निवर्त्तते तथाचोपाध्यभावत्वप्रकारकनिर्णये
धिकापेक्षायामपि व्याप्तिग्रहस्य निर्णये तु न तदपेक्षेति न परिशेषानुमानेऽसिद्ध्यादिदोष इति भावः यद्वेत्यादि ज्ञानप्रामाण्यसंशया
दिति ज्ञाने उपाध्यभावत्वप्रकारकज्ञाने प्रामाण्यसंशयादित्यर्थः ननु भाविव्याप्तिसंशयानुरोधात् तत्रोपाध्यभावत्वप्रकारकज्ञानमे
वावश्यकमिति कल्पनीयं न तु तज्ज्ञाने परिकल्प्य तत्राप्रामाण्यसंशयः कल्पनीयो गौरवादित्यत आह यद्वेति तथा चानुभवसिद्धे
र्थे गौरवं न दोषायेति भावः इहापि प्रवृत्तेपि ज्ञानप्रामाण्यसंशयात् तत्संशयप्रयोजकता तस्य उपाध्यभावस्य प्रथमदर्शनेनेति उ
पाध्यभावत्वप्रकारकज्ञानजनकोपाधियोग्यानुपलम्भादिसामग्रीसत्त्वे इत्यादि निश्चितत्वात् उपाध्यभावत्वेन निश्चितत्वात् निश्चि
तत्वे केदृशे निश्चये प्रथमदर्शनेनेत्यस्याभेदेनान्वयः धान्येन धनवानितिवत् तथाचोपाध्यभावत्वप्रकारकज्ञानजनकसामग्री

त्वेन प्रथमस्योपाधित्वेनापि ज्ञानं संभवतीति प्रामाण्यसंशयस्योपयोग इति भावः यद्यप्युक्ते उपाध्यभावत्वप्रकारकत्वेन ज्ञानजनक
सामग्र्यभावेन तादृशज्ञानानुत्पत्तौ प्रतिबंधकाभावेन तत्संशयसंभवे प्रामाण्यसंशयस्य नोपयोगः संभवतीति ननूपाध्यभाव
त्वप्रकारकज्ञाने प्रतिकारणांतरं किंचित्कल्पनीयं तादृशाभावादेव तादृशज्ञानाभावोपपत्तावलं प्रामाण्यसंशयकल्पनयेत्यत आह
व्याप्तिग्राहकांतरेति उपाधियोग्यानुपलंभाद्यतिरिक्तस्य तद्ग्राहकत्वासंभवादित्यर्थः सकृद्दर्शनस्य उपाधियोग्यानुपलंभस
हकृतस्याधिकरणस्वरूपग्राहकस्य तद्ग्राहकत्वात् उपाध्यभावत्वप्रकारकनिश्चयजनकत्वात् तन्निश्चयेपीति उपाध्यभाव
त्वेन व्याप्तिनिश्चयेपीत्यर्थः तत्संशयः व्याप्तिसंशयः तथा चोपाधियोग्यानुपलंभाद्यतिरिक्तस्य व्याप्तिनिश्चायकत्वासंभवेन
तस्यैव तन्निश्चायकत्वात्तादृशानुपलंभादिसत्वे प्रथममेवोपाध्यभावत्वेन व्याप्तिनिश्चितत्वान्न निश्चयेपि पश्चादनुभूयमानो व्याप्ति
संशयस्तु ज्ञानप्रामाण्यसंशयाद्येवोपपादनीयो नान्यथेति भावः क्वचित्सविशेषणासकृद्दर्शनगम्यत्वादिति पाठः तत्र विशेषणा

एम

उपाधियोग्यानुपलंभसहकृतत्वाधिकरणस्वरूपग्राहकेण सकृद्दर्शनगम्यत्वादिति प्रथमोऽसन्ननिश्चयेउपाध्यभावत्वावच्छिन्नवि
शिष्टसाध्यसामानाधिकरण्यस्य विषयत्वे बाधकाभावादित्यर्थः त्वमेणाशंकते नचैवमिति एवं व्याप्तिप्रसक्तेः साध्यसाधनसह

सहचारस्याहकातिरिक्तानपेक्षणात् प्रत्यक्षेपि· धूमत्वसामानाधिकरण्यप्रत्यक्षेपि प्रथमं· साध्यादिसन्निकर्षानंतरं व्याप्तिनिश्चयस्या
दिति· प्रमात्मकतन्निश्चयस्याप्यादित्यर्थः तत्र· प्रत्यक्षे· विषयस्य· विशेष्यसंबंधविशेषणयोश्च· कारणत्वादिति तथा च विशिष्टप्र
क्षजनकस्य विशेषणवद्विशेष्येंद्रियसन्निकर्षस्याभावेन प्रत्यक्षे जनत्वसत्त्वमिति भावः नैयायिकमतमनुसृत्येदं· मीमांसकम
तेप्रमायाः गुणाजन्यत्वाभावेन तादृशप्रसंगं प्रति तथाविधसन्निकर्षस्याजनकत्वादिति बोध्यं वस्तुतस्तु वन्हेः साध्यत्वे धूमस्य हेतुत्वे
प्रत्यक्षे व्याप्तिप्रसक्त्यभावापादनेन प्रत्यक्षस्य हेतुत्वेन च व्याप्तिप्रसक्त्यभावापादनेन वा· न्यायाः· वन्हिधूमसहचारग्राहकातिरिक्तस्य प्रत्यक्षे इ
न्द्रियसन्निकर्षस्यैव तद्ग्राहकत्वेन साध्यसाधनसहचारग्राहकस्यैव तद्ग्राहकत्वाभावात्· न द्वितीयः· साध्यतद्व्याप्यनिष्ठसहचारग्रा
हकस्यैव व्याप्तिग्राहकत्वोपगमेन वन्हिप्रत्यक्षे निष्ठसहचारग्राहकस्य तद्ग्राहकत्वात्· वन्हेः साध्यत्वे प्रत्यक्षस्य व्यभिचारित्वादिति मत
त्वं ननु केचिद्ग्रामप्रत्यक्षे पर्वतो वन्हिव्याप्य इति सर्वानुभवसाक्षिको व्यवहारो न स्यात्· त्वया तत्र वन्हिव्याप्तिग्रहानंगीकारेण व्यवहा
रजनकस्य व्यवहर्तव्यज्ञानस्याभावादित्यत आह· केचिदिति अयं संसर्गाग्रहात्· आहार्यसंसर्गाग्रहात्· तद्व्यवहारः· अयं पर्वतो वन्हि
व्याप्य इति व्यवहारः· दोषमाहात्म्यात्· दोषाधीनात् दोषस्य विषयाभावादिरूपो बोध्यः· तथा च विषयाभावादिरूपदोषाधीनो यो

व्याप्तिस्मरणपुरोवर्तिज्ञानं सन्निहितवह्निव्याप्यसंसर्गाग्रहस्तस्मादृश्यं गतमौवह्निव्याप्य इति व्यवहार इति भावः नचात्रापीति सर्व
त्रासमाहाविसर्थः · वह्निव्याप्यत्वेन व्यवहृजं मर्हव तत्त्वेनाव्यवहृतत्वेनासमाहाविति यावत् तथा · दोषाभावीनन्नादृशासंसर्गा
ग्रहः तथा च विषयाभावरूपदोषस्योभयत्र तुल्यत्वादसंसर्गाग्रहरूपारोपस्यत्रापि स्यादिति भावः आरोपेसति निमित्तानुसरण
मित्यादि आरोपेसति · असंसर्गःस्यग्रहरूपारोपे प्रामाणिके सति · निमित्तानुसरणं · तादृशारोपयावत्कारणकलापानुसरणं
मनुतिमित्तमस्तीति · ननु दोषरूपं किंचित्कारणमस्तीति कल्पेवारोपः कल्पनीयः इत्यभ्युपगमात् · इति सर्वप्रामाणिकैः त्वी
णत् · तथा च कारणानां तराभावेन तत्समानान्तरेऽसंसर्गाग्रहरूपारोपत्वनास्तीति न तथा व्यवहारः फलानुरोधात्कल्पनायाः इति भा
वः उपाध्यभावरूपव्याप्तिस्मृतेः दर्शनगम्यत्वमुपपाद्य व्यापकसामानाधिकरण्यरूपव्याप्तेर्व्याप्तित्वेन सन्निकर्षदर्शनगम्यत्वे
वक्तव्यत्वं केषांचिन्मतं दूषयितुं तन्मतमनुपन्यस्यति केचिदित्यादिना तदुभयमपि · असंतान्योन्याभावघटितव्याप्तिद्वय
मपि योग्यत्वात् · तादृशात्यंताभावप्रतियोगित्वाभावस्य तादृशान्योन्याभावप्रतियोगित्वाभावस्य च योग्यपर्यन्तत्वाच्च सामा एम
नाधिकरण्यं न तु स्वकसाध्यसत्वरूपत्वान्न तद्दुरूपत्वाच्च · प्रत्यक्षेण · चक्षुरादिना वह्निधूमसंबंधानुभवेन · साध्यसाधनसहचा

त्तानेन· प्रथममवगतमेवेति: प्रथमं· प्राथमिकसाध्याद्यसहचारदर्शनकाले· अवगतमेव· विषयीकृतमेव तथाच
तादृशप्रतियोगित्वाभावस्य साध्यत्वरूपतया साध्यसाधनसहचारग्रहकाले तादृशसाध्यसामानाधिकरण्यरूपप्रत्यासत्त्या सहचा
रदर्शनानन्तरमेव चारदर्शनसामग्रीजन्यप्रत्यक्षविषयत्वरूपतस्य तद्दर्शनग्राह्यत्वं स्वरूपमेवेति भावः अत्रानुभवं प्रमाण
यति महानसेत्यादि· महानसे· अस्मिन्महानसे· अवगतमिति· स्वरूपकीर्तनमात्रं तद्ज्ञानस्यानुमितिजनकत्वं वर्तमा
नमिति वार्थः तथाचैतन्महानससन्निकर्षे दृश्यमानप्राथमिकसाध्यसाधनसहचारग्रहकाले तन्महानसनिष्ठासत्ताभा
वप्रतियोगित्वसामान्याभाववान्वह्निरिति प्रत्यक्षतयैव व्याप्तेः सहचारदर्शनग्राह्यत्वे विरोधः प्रवृत्तेरिति भावः ननु स्वसमाधिकरण
सामान्यनिष्ठाभावप्रतियोगित्वसामान्याभावस्यैवैतन्महानसनिष्ठासत्ताभावप्रतियोगित्वसामान्याभावोऽप्यप्रयोजक एव
स्वाभावस्याधिकरणे रूपत्वेपि वृत्तमाधिकरणे तन्महानसनिष्ठाभावप्रतियोगित्वसामान्याभावप्रतियोगिनः पितृत्वादि
वृत्तिप्रतियोगित्वस्यायोग्यत्वेनायोग्यमात्रप्रतियोगित्वाभावात् तथाच वह्निस्वरूपाभावस्यायोग्यत्वे पितादृशप्रतियोगि

त्वसामान्याभावत्वरूपधर्मस्यायोग्यत्वेन कथं तेन तस्य तादृशाभावग्रह इति चेन्न नहि योग्यमात्रप्रतियोगिकत्वं तादृशाभावयोग्यतानि
यामकं किं तु प्रकृते योग्यानुपलंभः योग्यत्वं च हि पृथ्वीत्वरूपस्य स्ववृत्तिधर्मविशिष्टज्ञानस्य तन्निष्ठासंसर्गाभावप्रतियोगित्वसत्त्वमाप
द्यकीरूपस्य तदुपलंभापाद्यसंभवात् योग्यत्वं चेह विद्यमानो धर्मस्तद्योग्यत्वेन तथा च पक्षे ह्रनिष्ठधर्मविशिष्टप्रतियोगित्वस
त्त्वापादकं कापि तद्योग्यप्रतियोगिकस्य योग्योपलंभाभावस्य योग्यानुपलंभसत्त्वेन योग्यत्वं चेह तादृशप्रतियोगित्वाभावो यो
ग्यत्वेति भावः अधिकमत्रानुसंधेयं केचित्तु त्विं चित्वप्रतियोगियोग्यत्वेनैवाभावस्य योग्यत्वं तथा तादृशप्रतियोगित्वस
सामान्याभावस्य योग्यत्वात् अप्रतियोगित्वस्य प्रतियोग्यसामान्याभावत्वं तथा प्रतियोगियोग्यत्वस्यानेनत्वाद्वेति वदंति
न च एवं सद्वाचारदर्शनानुनासद्वाचारदर्शनसामग्रीतन्मतसत्त्वविषयत्वरूपकं दर्शनसामान्यत्वस्य संनिकृष्टरूपस्य समर्थप्रति
योगित्वाभावग्रहापत्तिः अधिकरणत्वरूपस्य तदभावस्य प्रथममेव ग्रहीतुं तत्त्वाद्दित्यन्यत्राह इत्यस्य इति सन्निकृष्टपदस्यार्थः
तथात्वग्रहेऽपि प्रथमं प्रतियोगित्वाभावाग्रहेऽपि यद्यपि संनिकृष्टे समानाधिकरणत्वसंबंधेन प्रतियोगित्वाभावग्रहापादने समा
नाधिकरणयोरेव व्याप्तिरिति पक्षे दोषापत्तिः संभवति अधिकरणयोरपि व्याप्तिरिति पक्षे च निर्धूमव्याप्ताभावापि नहि कादर्शनात्
त्वासंभवं प्रथमके स्वस्थाप्ति अधिकरणत्वसमप्रतियोगित्वस्य प्रतियो

एप

१०

[OrderDescription]
,CREATED=01.10.19 10:34
,TRANSFERRED=2019/10/01 at 10:47:55
,PAGES=77
,TYPE=STD
,NAME=S0001923
,Book Name=M-2274-SHARIRAK BHASYA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF

FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF

FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF

FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF

FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF

FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,